ओज्यत्वादन्त्यानुप्रास एव तत्”॥ “यथावस्थमिति” यथा सम्भवमनुस्वारविसर्गस्वरसंयुक्ताक्षरविशिष्टम्। एष च प्रायेण पादस्य पदस्य चान्ते प्रयोज्यः। पादान्तगो यथा “केशः काशस्तवकविकासः कायः प्रकटितकरभविलासः। चक्षुर्दग्धवराटककल्पं त्यजति न चेतः काममनल्पम्”॥ पदान्तगो यथा। “मन्दं हसन्तः पुलकं वहन्त इत्यादि। “शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्य्यमात्रतः। लाटानुप्रास इत्युक्तोऽनुप्रासः पञ्चधा ततः” इति। यथा “स्मेरराजीवनयने! नयने किं निमीलिते?। पश्य निर्जितकन्दर्पं कन्दर्पवशगं प्रियम्॥ अत्र विभक्त्यर्थस्यापौनरुक्त्येऽपि मुख्यतरस्य प्रातिपदिकांशद्योत्यधर्म्मिरूपस्याभिन्नार्थत्वाल्लाटानुप्रासत्वमेव। ‘नयने तस्यैव नयने” अत्र द्वितीय नयनशब्दो भाग्यवत्त्वादिगुणविशिष्टत्वरूपतात्पर्य्यमात्रेण भिन्नार्थः। यथा वा। “यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य। यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य”॥ अत्रानेकपदानां पौनरुक्त्यम्। एष च प्रायेण लाटजनप्रियत्वाल्लाटानुप्रास” इति।

**अनुप्लव** पु० अनु—प्लु—अच्। सहाये, अनुचरे, दासे च। “सानुप्लवः प्रभुरपि क्षणदाचराणामिति” रघुः।

**अनुबन्ध** पु० अनु+बन्ध—यथायथं भावादौ घञ्। बन्धने, इच्छापूर्वकदोषविशेषाभ्यासे, “अनुबन्धादिकं दृष्ट्वा सर्वं कार्य्यं यथाक्रममिति” स्मृतिः। “अनुबन्धः पौनःपुन्येनाभिनिवेश” इति रघु०। शास्त्रस्यादौ वक्तव्येषु अधिकारिविषयप्रयोजनसम्बन्धेषु, “अनुबन्धो नाम विषयप्रयोजनाधिकारिसम्बन्ध” इति “अस्य वेदान्तप्रकरणत्वात्तदीयैरेवानुबन्धैस्तद्वत्तासिद्धेरिति च” वेदा०सा० “ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते। ग्रन्थादौ तेन वक्तव्यः सम्बन्धः स प्रयोजन” इत्युक्तेः विषयप्रयोजनादीनामारम्भप्रयोजकत्वात् तद्धेतुत्वम्। अस्मिन् पक्षे च अनुबध्यते अनेनेति करणे घञ्। मुख्यानुयायिनि अप्रधाने, बालकादौ प्रकृतस्यानुवर्त्तने, संबन्धे, वातपित्तादिदोषाणामप्राधान्ये, प्रकृतिप्रत्ययागमादेशानां विकरणागमगुणवृद्ध्यादिकार्य्यविशेषार्थमनुबन्धनीये परिनिष्पन्नपदकालेषु अश्रूयमाणतया नश्वरे इत्संज्ञतया कृतलोपे वर्णादौ, “पदानिड्विड्विकरणाद्यनुबन्धगणोदितम् कर्म्मोच्चारणमात्रेण स्पष्टमत्रानुबध्यत इति” कविकल्पद्रुमः। फलसाधने पुनःपुनरनुष्ठानाभ्यासे, “अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः। सत्त्वापराधौ चालोक्य दण्डं दण्ड्येषु पातयेदिति” मनुः। बन्धेऽपि मेदिनिः। आरम्भे, शब्दरत्ना०। अनुसरणे “शान्तज्वरोऽपि शोध्यः स्यादनुबन्धभयान्नर इति” सुश्रुतम्। सन्ततसम्बन्धे (अविच्छेदे) “सानुबन्धाः कथं न स्युः सम्पदो मे निरापद” इति रघुः। अनुबध्यते अनुरुध्यते कर्म्मणि घञ्। पश्चाद्भाविनि शुभाशुभे। “अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्” इति गीता पश्चात्सम्बन्धे च। “यदग्रे चानुबन्धे च सुखं मोहनमात्मन” इति गीता।

**अनुबन्धिन्** त्रि० अनुबध्नाति अनु+बन्ध—णिनि। सहचरे, अनुगते, अनुरोधिनि, व्यापके च। स्त्रियां ङीप्। “गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव” इति रघुः। “अधश्च मूलान्यनुसन्ततानि कर्म्मानुबन्धीनि मनुष्यलोके” इति गीता। “सूक्ष्मानुबन्धी सूक्ष्मश्च सुगन्धो रोचनो मृदुरिति” “मेदःकषायैः खलु रोग एष सुदुस्तरो वर्षगणानुबन्धी” इति च सुश्रुतम्।

**अनुबन्धी** स्त्री अनुबध्यतेऽतिश्वासेन व्याप्रियतेऽनया अनु+बन्ध—घञ् गौरा० ङीष्। हिक्कारोगे, तृष्णायाञ्च।

**अनुबन्ध्य** त्रि० बधार्थं बन्धोऽनुबन्धः अनु+बन्ध-कर्म्मणि ण्यत्। बधार्थं बध्ये गवादौ। “नानुबन्ध्याबधोऽपि वा। तयोर्द्वारविभागस्य नैव संप्रति वर्त्तते” इति स्मृतिः।

**अनुबोध** पु० अनु+बुध—णिच्—घञ्। पूर्व्वलिप्तचन्दनादेर्गन्धोद्दीपनार्थं पुनर्मर्दनादौ, पश्चाद्बोधे च।

**अनुब्राह्मण** न० ब्राह्मणं मन्त्रेतरवेदभागस्तत्सदृशम्। ब्राह्मणसदृशे ग्रन्थे। तदधीते वेद वा इनि। अनुब्राह्मणी ब्राह्मणसदृशग्रन्थाध्यायिनि, तद्वेत्तरि च त्रि० स्त्रियां ङीप्।

**अनुभव** पु० अनु+भू—अप्। स्मृतिभिन्ने ज्ञाने। विषयानुरूपभवनाद्धि बुद्धिवृत्तेरनुभवत्वम्। “वृत्तिसारूप्यमितरत्र” पात० सूत्रे, विषयानुरूपत्वं चित्तवृत्तेरभिहितम्। तथाहि यथा पयः प्रणाल्या क्षेत्रादिकं प्राप्य चतुरस्राद्याकारेण परिणमते एवमेव इन्द्रियादिप्रणाल्याऽन्तःकरणं वहिर्निःसृत्य विषयाकारेण परिणमते तादृशपरिणामरूपवृत्त्या च विषयगतमज्ञानं निवारयतीति अन्तःकरणस्य विषयरूपानुरूपभवनात् अनुभवत्वम्। स्मृतौ तु विषयसन्निकर्षाभावात् न विषयाकारताप्राप्तिरिति तद्भिन्ने ज्ञाने एवास्य प्रयोगोपाधिता इति सांख्यवेदान्तिमतम्। अनुभवस्य प्रत्यक्षानुमानोपमाशाब्दभेदेन चतस्रो विधाः इति नैयायिकादयः। वेदान्तिनो मीमांसकाश्च अर्थापत्त्यनुपलब्धिरूपमधिकं तद्भेदद्वयमुररीचक्रुः। वैशेषिकाः सौगताश्च